| | | |
|---|---|---|
| (1) A quarter (2) Eye (3) Rays of the sun (4) Heaven. | 1 2 3 4 5 6 7 8<br>दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु | (5) Thunder bolt (6) Speech (7) An arrow (8) Water. |
| (9) The earth, (10) A cow. | 9 10<br>भूमौ पशौ च **गो**शब्दो विद्वद्भिर्दशसु स्मृतः ॥८५४॥ | |
| (1) An ornament. (2) A tail. (3) Excellent | 1 2 3 4 5 6<br>भूषायां लाङ्गूले प्रधानशृङ्गप्रभावपुण्ड्रेषु । | (4) Horn (5) Power. (6) A mark on the forehead. |
| (7) A flag (8) Mark, sign (9) Horse. | 7 8 9 a<br>ध्वजलक्ष्मतुरङ्गेषु च नवसु **ललामं** प्रचक्षते प्राज्ञाः ॥८५५॥ | |
| (1) The sun (2) A monkey(3)Frog. | 1 2 3 4 5 6<br>अर्कमर्कटमण्डूकविष्णुवासववायवः । | (4) Vishnu (5) Indra (6) Wind. |
| (7) A horse, (8) Lion. | 7 8 b 9 10<br>तुरङ्गसिंहशीतांशुयमाश्च **हरयो** दश ॥८५६॥ | (9) The moon. (10) Pluto, Yama. |
| (1) An element of which five are enumerated | 1 2<br>पृथिव्यादिषु भूतेषु शरीरेषु रसादिषु । | (2) A constituent part of the body. |
| (3) A metal (4) Natural condition. | 3 4 5<br>लोहेषु च स्मृतो **धातुः** स्वभावे गैरिकादिषु ॥८५७॥ | (5) Mineral ore. |
| (1) The tip of an elephant's trunk (2) A lotus(3) The blade of a sword. | 1 2 3 4 5<br>द्विरदकराग्रे पद्मे खड्गफले व्योम्नि वाद्यभाण्डमुखे । | (4) The sky (5) The head of a drum. |
| (6) A medicine. (7) Water. | 6 7 8<br>अगदे जले च तीर्थे **पुष्कर**मष्टासु निर्दिष्टम् ॥८५८॥ | (8) A place of pilgrimage. |
| (1) A living being. | 1 2<br>चतुर्विधेषु जीवेषु पृथिव्यादिषु पञ्चसु । | (2) An element. |
| (3) Passed (4) An evil spirit in attendance on Rudra. | 3 4<br>अतीते देवयोनौ च **भूत**शब्दं प्रचक्षते ॥८५९॥ | |
| (1) Colour (2) Caste (3) Beauty, splendour. | 1 2 3 4 5<br>शुक्लादौ ब्राह्मणादौ च शोभायामक्षरे व्रते । | (4) Letter (5) Vow. |
| (6) Arrangement of a song (7) Praise (8) Dress. | 6 7 c 8 d<br>गीतक्रमे स्तुतौ वेषे **वर्ण**शब्दं प्रचक्षते ॥८६०॥ | |
| (1) A sentiment of which 9 are enumerated. | 1 e 2 3 4<br>शृङ्गारादिषु नवसु च लवणादिषु षट्सु पारदे रागे । | (2) Taste (3) Mercury, quicksilver affection (4) Love. |
| (5) Juice (6) Semen, virile (7) Quality (8) Any constituent part of the body | f 5 6 7 8 9 10<br>निर्यासवीर्यगुणधातुविषघृतादौ **रसः** प्रोक्तः ॥८६१॥ | (9) Poison (10) Melted butter, Ghee. |
| (1) Vulva (2) A landing place at a river's side. | 1 2 3<br>योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि । | (3) A minister and 18 other officers of state. |
| (4) A holy place. (5) A vessel. | 4 5 6<br>पुण्यक्षेत्रे तथा पात्रे **तीर्थं** स्याद्दर्शनेषु च ॥८६२॥ | (6) A school of Philosophy. |

a ललामं च b सीताशुर्यमा हरयो, सीताशुरर्यमा हरयो c वर्पे d प्रयुंजते e लवणादिषु पारदे, लवणादिकषट्सु पारदे, लवणादिषु न सु, नवसु, लवणादिपु षट्सु पारदे च f निर्यासे गुणवीर्ये, गुर्णवीर्ये, धातुगुणवृतादौ रसः शब्दः, निर्यासगुणवीर्य धातुविषघृतादौररसः प्रोक्तः, निर्यासवीर्यगुणधातुविषघृतातौ रसः प्रोक्तः ।